श्रीगणेशायनमः॥हरिः ॐ॥अथप्रदोषनिर्णयोलिख्यते॥हेमाद्रिनि
गमः॥कृष्णाष्टमीचतुर्दशीसावित्रीवटपैतृकी॥अनंगत्रयोदशीरंभाउपो
ष्याः पूर्वसंयुताः॥पक्षद्वयेत्रयोदश्यांनिराहारोभवेद्दिवा॥घटित्रयादस्त
मयात्पूर्वंस्नानंसमाचरेत्॥इष्टंपञ्चम्यपूजांसमाधाय॥एवमाराधये
द्देवंप्रदोषेगिरिजापतिं॥ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्चपूजये
त्॥सर्वपापक्षयकरीसर्वदारिद्र्यनाशिनी॥शिवपूजेयमाख्यातासर्वा
ष्टफलप्रदा॥बहुनात्रकिमुक्तेनश्लोकार्धेनब्रवीम्यहं॥ब्रह्महत्यायुतंवापि
शिवपूजाविनाशयेत्॥मयाकथितमेतत्तेप्रदोषेशिवपूजनं॥रहस्येस
र्वजंतूनांअत्रतास्तेवसंशयः॥स्कंदेनब्रह्मोत्तरखंडेसूक्तं॥यदात्रयोदशी
शुक्लाभंदवारेणसंयुता॥आराध्यंसव्रतंतत्रसंतानफलसिद्धये॥ततस्तु

। लोहितेभानौस्नातःसुनियतोव्रती॥पूजास्थानंततोगत्वाप्रदोषेशिवमर्चयेत्॥निवेद्यकर्मजानंतुदद्याद्दक्षानुसारतः॥दक्षिणाब्राह्मणेभ्यश्चततोमौनंविसर्जयेत्॥इतिप्रदोषव्रतंस्कंदपुराणेयुक्तं॥समयमयूखे॥प्रदोषव्यापिलेदिनद्वयेआव्यापिलेवापूर्वा॥त्रयोदश्यांतुकर्तव्याद्वादशीसहितासुने॥यदास्यात्तिथयोरुभयोप्रदोषव्यापिनीतिथिः॥तत्रोत्तरत्रनक्तंस्यादुभयत्रापिसामतः॥दिवारात्रौव्रतंयत्रएकमेकतिथौगतं॥तस्यामुभयथायोगिन्यामाचरेत्तद्व्रतंव्रती॥कर्मणोयस्ययःकालस्तत्कालव्यापिनीतिथिः॥योयस्यविहितःकालःकर्मणास्तुंक्रमेण॥विद्यमानोभवेदंगेनोक्षितोपक्रमेणतु॥ऋतसंध्याजपविधिःशिवपूजांसमारभेत्॥प्रदोषव्यापिनितस्यादिवानक्तंविधीयते॥प्रदोषेशिवमभ्यर्च्यनक्तंभोक्ष्यामिशंकर॥पक्षद्वयेत्रयोदश्यांनि

शाहरोभवेद्दिवा॥ऋतसंध्याजपविधिःशिवपूजांसमारभेत्॥अस्तमानंसमारभ्यसार्द्धाःसप्तचनाडिकाः॥प्रदोषइतिविख्यातस्त्वर्धयामततःस्मृतः॥त्रिमुहूर्त्तंप्रदोषस्याज्ज्ञानावस्तंगतेसति॥नक्तंतुतत्रकुर्वीतइतिशास्त्रस्यनिश्चयः॥यजनंप्रतिमानंतुउत्तमांलतिकीर्त्तितं॥उदयेचैवमध्याह्नेप्रदोषेचार्धयामके॥प्रदोषोस्तमयादूर्ध्वंघटिकात्रयमुच्यते॥त्रियामारजनीप्राहुर्मुक्तायंचचतुष्टयं॥नाडीनांतदुभेसंध्येदिनस्यांतसंज्ञितं॥रुद्रव्रतेषुसर्वेषुकर्त्तव्यासंमुखीतिथिः॥कैलासशैलभवनेत्रिजगज्जनित्रीगौरीनिवेद्यकनकांचितपीठमध्ये॥नित्यंविधातुमथिवांछतिशूलपाणौदेवाःप्रदोषसमयेतुभजंतिसर्वे॥वाग्देवीधृतवल्लकेरतमखोवेणुक्वणन्यञ्जजस्तालोनिंद्रकरोमहाभगवतीगेयत्रयोगान्विता॥विष्णुस्तांप्रमृदंगलंबनयदुर्देवाः

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

प्रदोषनि· समंतास्थिताःसेवंतेतमनुप्रदोषसमयेदेवंमृडानीपतिं॥गंधर्वयक्षप
२ तयोरगसिद्धसाध्यविद्याधरामरवराप्सरसांगणाश्च॥येन्येत्रिलोकनि
लयाःसहभूतवर्गाःप्राप्तेप्रदोषसमयेहरपार्श्वसंस्थाः॥अतःप्रदोषे
त्रिवएकएवपूज्योथनान्येहरिपद्मजाद्याः॥तस्मिन्नमहेश्वरोविधिपूज्यमाने
सर्वेप्रसीदतिसरा---सराधिनाथाः॥त्रयोदश्यांतथारात्रौसोपहारस्त्रि
लोचनं॥दृष्ट्वेदंप्रथमेयामेसर्वैपापैःप्रमुच्यते॥पृथिव्यांयानितीर्थानि सा
गरांतानियानिच॥अंडुमाश्रियतिष्ठंतिप्रदोषेगोवृषस्यच॥स्पृष्ट्वातुवृष
णोतस्यशृंगमध्येविलोक्यच॥यत्फंचककुदंचैवसर्वपापैःप्रमुच्यते॥ये
रि नार्चयंतिगिरिशंमहितेप्रदोषेअभ्यर्चितंत्रिवपदंप्रणमंतिनान्ये॥येन राम
कथांश्रुतिपुटैर्नपिबंतिमूढास्तेजन्मजन्मसुमवंतिनरादरिद्राः॥त्रयोद २

प्रदोषनि· शीतुकर्त्तव्याह्यदर्शीसहितामुने॥सृतविद्धानकर्त्तव्यादर्शःपूर्णाकदाचन॥वर्जे
३ यित्वामुनिःश्रेष्ठसावित्रीव्रतमुत्तमुत्तमं॥एवमेकादशीग्राह्याद्वादश्यांतुत्रयो
दशी॥पाद्मे त्रयोदशीतुकर्तव्यामवेद्याचपराह्णिकी॥द्वितीयापिमुहूर्तांचेल
तिपद्यापराह्णिकी॥षष्ठ्यष्टमीत्वमावास्याकृष्णपक्षेत्रयोदशी॥एताःपरयुताः
हेमाद्रौउक्तं॥एकादशीतृतीयाचषष्ठीचैवत्रयोदशी॥पूर्वाविद्धातुकर्तव्यायदि
नस्यात्तरेदिनि॥एकादश्यष्टमीषष्ठीद्वितीयाचचतुर्दशी॥त्रयोदशीअमावा
स्याउपोष्यास्युःपरान्विता॥द्वितीयापंचमीवेधाद्दर्शमीचत्रयोदशी॥चतुर्द
शीचोपवासेहस्युःपूर्वोत्तरेतिथिः॥वारणेनसमायुक्तामधोरुद्धत्रयोदशी॥गौ
गायांयदिलभ्येतसूर्यग्रहसमा॥शनिवारसमायुक्तशनैःशततिषाय राम
दि॥महामहेतिविख्यातात्रिकोटिकुलमुद्धरेत्॥इतिप्रदोषनिर्णयःसमाप्तः॥ ३
जोगळेकरोपनामकहरिभट्टात्मजपरशुरामेणलिखापितं॥स्वार्थेपरार्थेच॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥प्रदोषनिर्णयःसमाप्तः॥श्रीगुरु॥श्रीराम॥
॥ पर श्रीभट्टजोगळेकरयाचेपुस्तक॥

राम
३